ॐ श्रीसायीश्वराय नमः। हरिः ॐ

om śrīsāyīśvarāya namaḥ | hariḥ om

ॐ तच्चं योरावृ्णीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवी स्वस्तिरस्तु नः। स्वस्तिर्-मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजं। शं नो अस्तु द्विपदे। शम् चतुषपदे॥

om taccaṁ yorāvṝṇīmahe | gātuṁ yajñāya | gātuṁ yajñapataye | daivī svastirastu naḥ | svastir-mānuṣebhyaḥ| ūrdhvaṁ jigātu bheṣajaṁ | śaṁ no astu dvipade | śam catuṣapade ||

ॐ शांतिः शांतिः शांतिः॥

om śāntiḥ śāntiḥ śāntiḥ ||

ॐ सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्। सभूमिं विश्वतो वृ्त्वा। अत्यतिष्ठद्दशाम्गुलं॥

om sahasraśīrṣā puruṣaḥ | sahasrākṣaḥ sahasrapāt | sabhūmiṁ viśvato vṝtvā | atyatiṣṭhaddaśāmgulaṁ ||

पुरुष एवेदग्ं सर्वं। यद्भूतं यच्च भव्यं। उताम्ृ्तत्वस्येशानः। यदन्नेनातिरोहति॥

puruṣa evedagṁ sarvaṁ | yadbhūtaṁ yacca bhavyaṁ | utāmṝtatvasyeśānaḥ | yadannenātirohati ||

एतावानस्य महिमा। अतो ज्ययाग्श्च पूरुषः। पादोऽस्य विश्वाभुतानि। त्रिपादस्याम्ृ्तं दिवि॥

etāvānasya mahimā | ato jyayāgśca pūruṣaḥ | pādo2sya viśvābhutāni | tripādasyāmṝtaṁ divi ||

त्रिपादूर्ध्व उदैत्पुरुषः। पदोऽस्येहाऽऽभवात्पुनः। ततो विष्वंव्यक्रामत। साशनानशने अभि॥

tripādūrdhva udaitpuruṣaḥ | pado2syehā22bhavātpunaḥ | tato viṣvaṁvyakrāmat | sāśanānaśane abhi ||

तस्माद्विराडजायत। विराजो अधि पूरुषः। सजातो अत्यरिच्यत। पश्चाद्भूमिमथो पुरः॥

tasmādvirāḍajāyata | virājo adhi pūruṣaḥ| sajāto atyaricyata | paścādbhūmimatho puraḥ ||

यत्पुरुषेण हविषा। देवा यज्ञमतन्वत। वसंतो अस्यासीदाज्यं। ग्रीष्म इध्मश्शरद्धविः॥

yatpuruṣeṇa haviṣā | devā yajñamatanvata | vasaṁto asyāsīdājyaṁ | grīṣma idhmaśśaraddhaviḥ ||

सप्तासयान्परिधयः। त्रिः सप्त समिधः क्ताः। देवा यद्यज्ञं तन्वानाः। अबध्नन्-पुरुषं पशुं॥

saptāsayānparidhayaḥ | triḥ sapta samidhaḥ kr̆tāḥ | devā yadyajñaṁ tanvānāḥ | abadhnan-puruṣaṁ paśuṁ ||

तम् यज्ञं बर्हिषि प्रौक्षन्। पुरुषं जातमग्रतः। तेन देवा अयजम्त। सध्या ऋषयश्च ये॥

tam yajñaṁ barhiṣi praukṣan | puruṣaṁ jātamagrataḥ | tena devā ayajamta | sadhyā ṛṣayśca ye ||

तस्माद्यज्ञात्सर्व-हुतः । सम्भृतं पृषदाज्यम्। पशूंस्ताग्श्चक्रे वायव्यान्। आरण्यान्-ग्राम्याश्च ये॥

tasmādyajñātsarva-hutaḥ | sambhṛtaṁ pṛṣadājyam |
paśūgstāgścakre vāyavyān | āraṇyān-grāmyāśca ye ||

तस्माद्यज्ञात्सर्व-हुतः । ऋचः सामानि जिज्ञिरे । छंदाꣳसि जिज्ञिरे तस्मात् ।
यजुस्तस्मादजायत ॥

tasmādyajñātsarva-hutaḥ | ṛcaḥ sāmāni jijñire | chandāṁsi jijñire tasmāt | yajustasmādajāyata ||

त्स्मादश्वा अजायंत । ये के चोभयादतः । गावो ह जिज्ञिरे तस्मात् । तस्माज्जाता अजावयः ॥

tsmādaśvā ajāyanta | ye ke cobhayādataḥ | gāvo ha jijñire tasmāt | tasmājjātā ajāvayaḥ ||

यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् । मुखं किमस्य कौ बहू । कावूरू पादावुच्येते ॥

yatpuruṣaṁ vyadadhuḥ | katidhā vyakalpayan | mukhaṁ kimasya kau bahū | kāvūrū pādāvucyete ||

ब्राह्मणोऽस्य मुखमासीत् । बहू राजन्यः क्ृतः । ऊरू तदस्य यद्वैश्यः । पद्भ्यागं शूद्रो अजायत ॥

brāhmaṇo2sya mukhamāsīt | bahū rājanyaḥ kṛtaḥ | ūrū tadasya yadvaiśyaḥ | padbhyāgṁ śūdro ajāyata ||

चम्द्रमा मनसो जातः । चक्षोः सूर्यो अजाय्त । मुखादिंद्रश्चाग्निश्च । प्राणाद्वायुरजायत ॥

camdramā manaso jātaḥ | cakṣoḥ sūryo ajāyta |

mukhādindraścāgniśca | prāṇādvāyurajāyata ||

नाभ्या आसीदन्तरिक्षं । शीर्ष्णो द्यौयोः समवर्त । पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकाग्म् अकल्पयन् ॥

nābhyā āsīdamtarikṣaṁ | śīrṣṇo dauyoḥ samavarta | padbhyāṁ bhūmirdiśaḥ śrotrāt | tathā lokāgm akalpayan ||

वेदाहमेतं पुरुषं महांतम् । आदित्यवर्णं तमसस्तु-पारे । सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन् यदास्ते ॥

vedāhametaṁ puruṣaṁ mahāntam | ādityavarṇaṁ tamasastu-pāre | sarvāṇi rūpāṇi vicitya dhīraḥ | nāmāni kṛtvā2bhivadan yadāste ||

धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान्प्रदिशश्च-तस्रः । तमेवं विद्वानमृत इह भवति । नान्यः पंथा अयनाय विद्यते ॥

dhātā purastādyamudājahāra | śakraḥ pravidvānpradiśaśca-tasraḥ | tamevaṁ vidvānamṛta iha bhavati | nānyaḥ panthā ayanāya vidyate ||

यज्ञेन यज्ञमयजंत देवाः । तानि धर्माणि प्रथमान्या-सन् । तेह नाकं महिमानः सचंते । यत्र पूर्वे साध्याः संति देवाः ॥

yajñena yajñamayajanta devāḥ | tāni dharmāṇi prathamānyā-san | teha nākaṁ mahimānaḥ sacante | yatra pūrve sādhyāḥ santi devāḥ ||

अद्भ्यः संभूतः पृथिव्यै रसाच्च । विश्वकर्मणः समवर्तताधि । तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे ॥

adbhyaḥ sambhūtaḥ pṛthivyai rasācca | viśvakarmaṇaḥ samavartatādhi | tasya tvaṣṭā vidadhadrūpameti | tatpuruṣasya viśvamājānamagre ||

वेदाहमेतं पुरुषं महांतम् । आदित्यवर्णं तमसः परस्तात् । तमेवं विद्वानमृत इह भवति । नान्यः पंथा विद्यतेऽयनाय ॥

vedāhametaṁ puruṣaṁ mahāntam | ādityavarṇaṁ tamasaḥ parastāt | tamevaṁ vidvānamṛta iha bhavati | nānyaḥ panthā vidyate2yanāya ||

प्रजापतिश्चरति गर्भे अंतः । अजायमानो बहुधा विजायते । तस्य धीराः परिजानंति योनिम् । मरीचीनां पदमिच्छंति वेधसः । यो देवेभ्य आतपति । यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये । रुचं ब्राह्मं जनयंतः । देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा असन् वशे ॥

prajāpatiścarati garbhe antaḥ | ajāyamāno bahudhā vijāyate | tasya dhīrāḥ parijānanti yonim | marīcīnām padamiccanti vedhasaḥ | yo devebhya ātapati | yo devānām purohitaḥ | pūrvo yo devebhyo jātaḥ | namo rucāya brāhmaye | rucaṁ brāhmaṁ janayantaḥ | devā agre tadabruvan | yastvaivaṁ brāhmaṇo vidyāt | tasya devā asan vaśe ||

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपं । अश्विनौ व्यात्तं । इष्टम्

मनिषाण। अमुं मनिषाण। सर्वं मनिषाण।

hrīśca te lakṣmīśca patnyau | ahorātre pārśve | nakṣatrāṇi rūpam | aśvinau vyāttam | iṣṭam maniṣāṇa | amuṁ maniṣāṇa | sarvaṁ maniṣāṇa |

ॐ तच्चं योरावृ्णीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवी स्वस्तिरस्तु नः। स्वस्तिर्-मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजं। शं नो अस्तु द्विपदे। शम् चतुषपदे॥

om taccaṁ yorāvr̆ṇīmahe | gātuṁ yajñāya | gātuṁ yajñapataye | daivī svastirastu naḥ | svastir-mānuṣebhyaḥ| ūrdhvaṁ jigātu bheṣajaṁ | śaṁ no astu dvipade | śam catuṣapade ||

ॐ शांतिः शांतिः शांतिः॥

om śāntiḥ śāntiḥ śāntiḥ ||